प्रकरणात् सर्व्वयागात्मकराजसूयाङ्गमक्षदेवनादिकमिति। ननु सर्व्वाङ्गमभिषेचनीयाङ्गमेव वा उभयथापि राजसूये तेषां कर्त्तव्यत्वाद्विचारोऽयमनुपयुक्त इति। न च प्रत्येकराजसूये प्रत्येकयागकाले तेषामनुष्ठानार्थं विचार इति वाच्यं तथा सति प्रत्येकाङ्गत्वेन प्रत्येकजन्यकलिकापूर्व्वोपकारकतया फलशिरस्कापूर्व्वानुपकारकत्वात् राजसूयाङ्गत्वानुपपत्तेः। न च कलिकापूर्व्वद्वारैव फलशिरस्कापूर्व्वोपकारकत्वमिति वाच्यं तत्तदङ्गापूर्वाणां प्रत्येकं षट्त्वस्य तेषाञ्च षट्कलिकापूर्व्वं प्रतिकारणत्वस्य कल्पनायां महागौरवात्। तस्माद्राजसूयाङ्गत्वेनाक्षदेवनादीनां सकृदेवानुष्ठानं तत्तदङ्गापूर्व्वद्वारा फलशिरस्कापूर्व्वोपकारकत्वं लाघवादिति चेत् सत्यं अक्षदेवनादीनामभिषेचनीयाङ्गत्वे यत्र प्रधानतया स्वतन्त्रेणाभिषेचनीयानुष्ठानं तत्राप्यक्षदेवनादिकरणापत्तेर्वारणार्थं विचारारम्भात्। अतएवाकाङ्क्षायाः कल्प्यत्वं स्थानप्राप्तौ दोष इति सङ्गच्छते अन्यथा राजसूयाङ्गत्वेनाभिषेचनीयेऽपि तस्याः क्लृप्तत्वात्। एवञ्चाभिषेचनीयसन्निधौ पाठस्तत्काले कर्त्तव्यताज्ञापनार्थमिति ध्येयम्। स्थानसमाख्ययोर्यथा। बहुमन्त्रानुक्त्वा "एतत् पौरोडाशिकं काण्डम्" इत्युक्तं पुरोडाशमन्त्रकाण्डे च "शुन्धध्वं दैव्याय कर्म्मणे देवयाज्यायै" इति मन्त्रः पठितः तत्र च शुन्धध्वमिति मन्त्रलिङ्गात् पात्रशोधने मन्त्रस्य विनियोग प्रतीयते स च पुरोडाशस्येदं पौरोडाशिकमिति प्रकृतिप्रत्ययार्थरूपसमाख्याबलात् पुरोडाशकाण्डोक्तानामुलूखलयज्ञादीनामपि क्रतूनां पुरोडाशपात्रशोधने प्रतीयते अथ च सान्नाय्यहोमसन्निधाने मन्त्रः श्रूयते यथा "सान्नाय्यान् ग्रहान् गृह्णाति" शुन्धध्वं दैव्याय कर्म्मणे देवयाज्यायै सान्नाय्येन जुहोति" इत्यादिदध्योदनरूपसन्निधानपाठात् स्थानबलात् सान्नाय्यपात्रशोधनाङ्गत्वम्। तथाहि पौरोडाशिकमित्यत्र प्रकृत्या पुरोडाश उच्यते तद्धितेन च मन्त्रादिकलापरूपं काण्डमुच्यते तद्धितवाच्यकाण्डपदार्थमन्त्रादेः पुरोडाशसम्बन्धित्वं तु न कस्यापि पदस्यार्थः, किन्तु समभिव्याहारलभ्यम्। तदुक्तम् "नैतदेवं समाख्या हि न सम्बन्धाभिधायिनी। पाकं हि पचिरेवाह कर्त्तारं प्रत्ययोऽप्यकः। पाकयुक्तः पुनः कर्त्ता वाच्यो नैकस्य कस्यचित्"। तथा च पौरोडाशिकपदस्य तन्मन्त्रसान्निध्यं विना तद्धितवाच्यकाण्डपदार्थे मन्त्रे पुरोडाशसम्बन्धित्वं न लभ्यते समाख्यान्यथानुपपत्त्या पौरोडाशिकपदस्य मन्त्रसान्निध्यं कल्पनीयमन्यथा समाख्याया अकिञ्चित्करत्वम्। सान्नाय्यहोमस्यापि पुरोडाशकाण्डपातितया तत्सम्बन्धेऽपि समाख्यासम्भवाच्चेति सान्नाय्येन मन्त्रस्य सान्निध्यं कल्प्यमिति प्रकरणादिकल्पनाचतुष्टयमात्रव्यवहितमिति सिद्धं समाख्यातः स्थानं बलवदिति। तदुक्तम्। "एकद्वित्रिचतुःपञ्चवस्त्वन्तरप्रकाशनम्। लिङ्गादीनाञ्च वैषम्यं श्रुत्यपेक्षं विधीयते। बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा। मध्यमानान्तु बाध्यत्वं बाधकत्वन्त्वपेक्षया"। स्थानसमाख्ययोर्विरोधे पार्थसारथिमिश्रमाधवाचार्य्यदेवनाथप्रभृतिभिरेवं व्याख्यातम्"।

पौर्व्वापर्य्यरूपक्रमो द्विविधः कालिको दैशिकश्च तत्र वैदिककर्म्मानुष्ठाने श्रुत्यादिभिः यः क्रमो नियमितः स सर्व्वोऽपि कालिकः। दैशिकस्तु "क्रमान्मेषादयः स्मृताः" एव इत्यादौ राशिचक्रपूर्व्वापरदेशस्थितत्वात्तेषां दैशिकक्रमवत्त्वम्। "वृत्तानुपूर्व्वं च नचातिदीर्घे" कुमा० इत्यत्रापि दैशिकक्रमः। क्वचित् उपदेशक्रमेण पदार्थानां क्रमवत्त्वम् यथा "वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा" या० स्मृ०। अत्र ब्राह्मणादीनां वर्णानां चतुर्णां क्रमेणोपदेशात् तत्क्रमेण ब्राह्मणादीनाम् क्रमिकत्वम्। एवं "तासां वर्णक्रमेणैव ज्यैष्ठ्यं पूजा च वेश्म च" मनुवाक्ये "अध्वर्य्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्" इत्यमरवाक्ये च उपदेशक्रमात् क्रमवत्त्वम्। गर्भाधानादीनां संस्काराणामुपदेशक्रमेणैव क्रमिकत्वम् क्वचित् पदार्थगतोत्पत्त्यादिक्रमेणापि पदार्थक्रमोऽभिधीयते इत्याद्यूह्यम्। स एवम् लक्ष्यक्रमव्यङ्ग्य असंलक्ष्यक्रमव्यङ्ग्य इत्यादावपि तथात्वम्।

अत्र क्रमणे "सागरः प्लवगेन्द्रेण क्रमेणैकेन लङ्घितः" भा० व० ११८७श्लो०। "न्यदर्शि तैर्द्धनभःकृतक्रमैः" नैष०। पादे "पदानि त्रीणि दैत्येन्द्र! सम्मितानि पदा मम" इत्युपक्रमे "त्रिभिः क्रमैरसन्तुष्टो द्वीपेनापि न पूर्य्यते" भाग० ८।१९।१९। बलिं प्रतिवामनोक्तिः। "अपि क्रमैरिमाल्लोकान् विश्वकायः क्रमिष्यति" तत्रैव २६श्लो० बलिं प्रति शुक्रोक्तिः। सामर्थ्ये "क्रमं बबन्ध क्रमितुं सकोपः" भट्टिः क्रमं सामर्थ्यं बबन्ध चकार क्रमितुं क्रमं यत्सामर्थ्यं तच्चकारेत्यर्थः" जयम०। सामर्थ्यहेतुव्यापारविशेष एव क्रमशब्दार्थ इति तु न्याय्यम्। अतएव "न क्रमः सञ्जीकृत आसीत्" "त्वया स-